**अवरवर्णज** पु० अवरवर्णः सन् जायते जन–ड । शूद्रे "श्वा तु दृष्टिनिपातेन स्पर्शेनावरवर्णजः" "ब्राह्मणान् वाधमानन्तु कामादवरवर्णजम्" इति च मनुः ।

**अवरव्रत** पु० अवरं अत्यन्तश्रेष्ठं व्रतमस्य । १सूर्य्ये २अर्कवृक्षे च । अवरम् अधमं व्रतमस्य । ३हीनव्रते त्रि० ।

**अवरशैल** पु० अवरः पश्चाद्वर्त्ती शैलः । अस्ताचले ।

**अवरस्तात्** अव्य० अवर+प्रथमाद्यर्थे अस्ताति । प्रथमा पञ्चमीसप्तमीष्वर्थे रवरशब्दस्यार्थे । अवरस्तात् रमणीयम्, आगतः वसति वा ।

**अवरहस** न० अवततं रहः अच् समा० । अवतते रहसि [अत्यन्तनिर्जने ।

**अवरार्द्ध** न० कर्म्म० । अपरभागे "सकृत्कर्म्म पितृणाम- परार्द्धं देवानाम्" इति । "अपरार्द्धतश्च परार्द्धतश्च परि- स्तृह्य" शत०ब्रा० २देहस्य पश्चाद्भागे च ।

**अवरार्द्ध्य** त्रि० अवरार्द्धे भवः यत् । शेषभागभवे । न वरत्वेन अर्घ्यते ऋध–णिच्–कर्मणि यत् । न्यूने । "नावरार्द्ध्यं ततः कुर्य्यात् पूर्णपात्रमिति स्थितिः" छन्दो० परि० । "अवरार्द्ध्यं न्यूनम्" स०त०रघु० "दशगवावरार्द्ध्या दक्षिणा" आ० स्ट० ।

**अवरीण** त्रि० अव+रिङ–क्त । तिरस्कृते । [न्ताल्पे ।

**अवरीयस्** त्रि० न वरीयान् न०त० स्त्रियां ङीप् । अत्य-

**अवरुग्ण** त्रि० अव+रुज–क्त । १भग्ने २रोगान्विते च ।

**अवरुद्ध** त्रि० अव+रुध–क्त । १प्रतिरुद्धे अन्यैरसंलक्षिते २गुप्ते च "अस्ति कश्चिद्राजस्तनुरवरुद्धश्चरन्" दशकु० इतर गमननिषेधेन रक्षितायां ३स्त्रियां स्त्री । (राखनी) ।

**अवरुद्धि** स्त्री अव+रुध भावे क्तिन् । १अवरोधने २प्रतिरोधे "इन्द्रियाणां वीर्य्याणाञ्चावरुद्धौ" श्रुतिः ।

**अवरूढ़** त्रि० अव+रुह–क्त । १कृतावरोहणे उच्चस्थानात् निम्नगते । २उत्पाटिते वृक्षादौ च ।

**अवरोचक** अवरोचयति रुचिहीनं करोति अव+रुच–णिच्– ण्वुल् । अवरोचके रोगभेदे "स्त्रेहगन्धिमुखं तत्र काम- श्वासावरोचकः" सुश्रु० ।

**अवरोध** पु० अव+रुध–भावे घञ् । १निरोधे "फेनाय- मानं स्रोतोऽवरोधः" सुश्रु० बलादि० मतुप् वा ठनौ बाधक इनि अवरोधवान् अवरोधी अवरोधयुक्ते त्रि० । कर्म्मणि घञ् । राजान्तःपुरस्थायां २योषिति, ३राज दारेषु च । "तत्र कृतावरोधानां भर्त्तृषु व्यक्तविक्रमम्" । "कलत्रवन्तमात्मानमवरोधे महत्यपि" रघुः आधारे घञ् । ४राजान्तःपुरे । "पश्चादवरोधे शतशोमदीयैः" इति रघुः । "निन्ये विनीतैरवरोधदक्षैः" कुमा० । "विस्रस्तवस्त्रमवरो- धवधूः पपात" माघः । ल्युट् । अवरोधनं निरोधे न० ।

**अवरोधक** त्रि० अव+रुध–ण्वुल् । १प्रतिरोधके २आवरके च । "सुधन्वा वीर्य्यवान्राजा मिथिलामवरोधकः" रामा० आर्षत्वात् कर्म्मणि न षष्ठी ।

**अवरोधायन** न० ६त० । अन्तःपुरे ।

**अवरोधिक** पु० अवरोधे तद्रक्षणादौ नियुक्तः ठन् । राजा- न्तःपुररक्षणार्थं नियुक्ते १वामनादौ । अवरोधः स्थानं निवासत्वेनास्त्यस्य ठन् । "नृपान्तःपुरस्थायां स्त्रियां स्त्री । "ययुस्तुरङ्गाधिरुहोऽवरोधिकाः" माघः ।

**अवरोधिन्** त्रि० अवरुणद्धि अव+रुध–णिनि स्त्रियां ङीप् । १रोधके २आवरके च ।

**अवरोपण** न० अव+रुह–णिच्–पः ल्युट् । उत्पाटने ।

**अवरोपित** त्रि० अव+रुह–णिच्–पः क्त । उत्पाटिते ।

**अवरोह** पु० अव+रुह–घञ् । १अवतरणे, (नामा) ऊर्द्ध- देशान्निम्नदेशगमने । कर्त्तरि संज्ञायां घ । तरोर्मूला- दग्रपर्य्यन्तमारूढ़ायां २गुडूच्यादिलतायाम् । ३अपादाने घञ् । चन्द्रादिलोके स्वर्गे, ततो हि भोगावसाने सर्व्वेऽवतरन्ति । तत्र देहिनां चन्द्रलोकादवरोह- प्रकारस्तावदुक्तः शा० सूत्रे तद्भाष्ये च यथा "कृतात्ययेऽनुशयवान् दृष्टस्मृतिभ्यां यथेतमनेवञ्च" शा० सू० । "इष्टादिकारिणां धूमादिवर्त्मना चन्द्रमण्डलमारूढ़ानां ततः प्रत्यवरोह आम्नायते "तस्मिन् यावत्सम्पातमुषित्वाऽथैतमेवाध्वानं पुनर्निवर्त्तन्ते यथेत"मित्यारभ्य यावत् "रम- णीयचरणाब्राह्मणादियोनिमापद्यन्ते कपूयचरणाः श्वा- दियोनिमिति" । तत्रेदं विचार्य्यते किं निरनुशया भुक्तकृत्स्न- कर्म्माणोऽवरोहन्ति? आहोस्वित् सानुशयाः? इति । किं तावत् प्राप्तं निरनुशया इति । कुतः? यावत्सम्पातमितिविशेष- णात् । सम्पातशब्देनात्र कर्म्माशय उच्यते सम्पतत्यनेना- स्माल्लोकादमुं लोकं फलभोगायेति । यावत्सम्पातमुषि- त्वेति च कृत्स्नस्य तस्य तत्रैव भुक्ततां दर्शयति । "तेषां यदा तत्पर्य्यवैतीति" च श्रुत्यन्तरेणैष एवार्थः प्रदर्श्यते । स्यादे- तत् यावदमुष्मिंल्लोक उपभोक्तव्यं कर्म्म तावदुपभुङ्क्त इति कल्पयिष्यामीति नैवं कल्पयितुं शक्यते यत् किञ्चेत्यन्यत्र परामर्शात् । "प्राप्यान्तं कर्म्मणस्तस्य यत् किञ्चेह करोत्य- यम् । तस्माल्लोकात् पुनरैत्यस्मै लोकाय कर्म्मणे" इति ह्यपरा श्रुतिर्यत्किञ्चेत्यविशेषपरामर्शेन कृत्स्नस्येह कृतस्य कर्म्मणस्तत्र क्षयितां दर्शयति । अपि च प्रायणमनारब्ध-